# श्री कृष्णार्जुन संवादः

## णिजन्तरुपाणि

कुरुक्षेत्रे सर्वे पाण्डवाः कौरवाः च युद्धाय अमिलन् । अर्जुनः एकः महायोधः। भगवान् श्री कृष्णः अर्जुनस्य मित्रं, दर्शनज्ञः, मार्गदर्शकः, प्रियसुहृद् सारथिः अपि च। गुडाकेशः स्वधनुः शस्त्राणि अस्त्राणि च गृहीत्वा, रिपून् कौरवान् संहर्तुं रथेन सम्मुखीभूय स्थितवान् । उभयोः पक्षयोः योद्धाः सर्वे युद्धार्थं समाहिताः। तदा पार्थः श्रीकृष्णं निवेदयति।

अर्जुनः उभयोः सेनयोः मध्ये रथं स्थापय मेऽच्युत।

कृष्णः सखे ! कुतः ?

अर्जुनः अत्र के के समाहिताः इति कृपया दर्शयतु।

कृष्णः अस्तु इति उक्त्वा रथं मध्ये स्थापयति।

माधवः पार्थाय तत्र उपस्थितान् गुरून् ,बन्धून् , स्वबान्धवान् ,मित्राणि च दर्शयति।

अर्जुनः हे गोविन्द ! एते सर्वे मम गुरवः, बान्धवाः च सन्ति । अयं गुरुपुत्रः अश्वत्थामा । एते शल्यादयः मम मातुलाः। दुर्योधनादयः मम भ्रातरः। भीष्मः अस्माकं पितामहः। अहं कथं गुरुजनैः सह युद्धं कर्तुं शक्नोमि ?

एवं वदतः अर्जुनस्य गात्रम् अकम्पत। तस्य हृदयं द्रवीभूतम्। गाण्डीवं धनुः हस्तात् निस्सरति। नेत्राभ्याम् अश्रूणि स्यन्दन्ति। तदा सः सखायै उद्दिश्य विषीदन् कथितवान् ।

अर्जुनः सखे ! कथम् एतान् ज्येष्ठान् ,बन्धून् मित्राणि च मारयामि ? स्वजनान् हत्वा भवान् मां किं सुखं वा राज्यं प्रापयति ? युद्धं तावत् हानिकारकः अस्ति । एतैः सह युद्धं मया न कारयतु । ते बान्धवाः एव राज्यं पालयन्तु । कुलक्षये सति सनातनाः कुलधर्माः प्रणश्यन्ति, "युद्धात् भिक्षया जीवनम् एव वरम्"

इत्युक्त्वा अर्जुनः तूष्णीं तिष्ठति।

कृष्णः हे पार्थ ! किमर्थं तव व्यामोहः? कुत्र ते शौर्यम् ,उत्साहः च गतः? भवान् क्षत्रियः क्षत्रियधर्मं पालयतु यतः पापलेशः न भवति, श्रेयः एव भविष्यति ।

"हतो वा प्राप्स्यसे स्वर्गं जित्वा वा भोक्ष्यसे महीम् "। तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः।

अतः दुष्टान् घातय साधून् पालय । स्वकर्तव्यस्य त्यागं मा करोतु । अस्माकं निधनं स्वधर्मे एव श्रेयः। अरीन् पराजयतु । अहं त्वां राज्यं प्रापयामि । आदर्शः क्षत्रियः भव !

यतः "धर्मो रक्षति रक्षितः" अहम् अवश्यं त्वया युद्धं कारयामि एव।

एवं श्री कृष्णः अर्जुनमुखान्तरेण जीवन यापनम् अबोधयत् ।

यतः "यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः। सः यत् प्रमाणं कुरुते लोकस्तदनुवर्तते" ।

By Vimala Honnavar